# 2022

## SANSKRIT — HONOURS

**Paper : CC-11**

**(Vedic Literature)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**विशेषोल्लेखं विना सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।**

**Section – A**

**Unit - I**

**(Marks : 30)**

1. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) अग्ने यं यज्ञमध्वरं
विश्वतः परिभूरसि।
स इद्देवेषु गच्छति॥

(b) सभामेति कितवः पृच्छमानो
जेष्यामीति तन्वा३ शूशुजानः।
अक्षासो अस्य वि तिरन्ति कामं
प्रतिदीव्ने दधत आ कृतानि॥

(c) यः प्राणतो निमिषतो महि-
त्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम॥

(d) अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तंतमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम्॥

Please Turn Over

2. निम्नोद्धृतेषु यथाभिमतं कस्यचि**देकस्य** मन्त्रस्य व्याख्या कार्या। 8×1

(a) अ॒ग्निर्होता॑ क॒विक्र॑तुः
स॒त्यश्चि॒त्रश्र॑वस्तमः।
दे॒वो दे॒वेभि॒रा ग॑मत्॥

(b) यदा॒दीध्ये॒ न द॑विषाण्येभिः
परा॒यद्भ्योऽव॑ हीये॒ सखि॑भ्यः।
न्यु॑प्ताश्च ब॒भ्रवो॒ वाच॒मक्र॑तँ॒
एमीदे॑षां निष्कृ॒तं जा॒रिणी॑व॥

(c) य आ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑
उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः।
यस्य॑ छा॒यामृतं॒ यस्य॑ मृ॒त्युः
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

***अथवा,***

अधोलिखितेषु सन्दर्भेषु यथाभिलाषम् ***एकतमस्य*** व्याख्या कार्या। 8×1

(a) तत्र 'अग्निमीळे' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(b) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(c) गतः सूक्तविनियोगः।

3. (a) ऋग्वेदसंहितायाः प्रथमसूक्ते कति मन्त्राः सन्ति? तत्र कः ऋषिः, का देवता, किं वा छन्दः? सूक्तेऽस्मिन् स्तुतायाः देवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्। 1+1+1+1+8

***अथवा,***

(b) देवीसूक्तम् ऋग्वेदस्य कस्मिन् मण्डले आम्नातम्? कोऽत्र ऋषिः, का देवता, किं वा छन्दः? सूक्तस्यास्य दार्शनिकं तात्पर्यं निरूप्यताम्। 1+1+1+1+8

**Unit - III**

**(Marks : 10)**

4. (a) अधोलिखितयोः मन्त्रयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 5×2

(i) सहृ॑दयं सांम॒नस्य॒मवि॑द्वेषं कृणोमि वः।
अ॒न्यो अ॒न्यम॒भि ह॑र्यत व॒त्सं जा॒तमि॑वा॒घ्न्या॥

(ii) मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥

*अथवा,*

(b) अधोलिखितयोः यथाभिमतम् ***एकतरस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) येन देवा न वियन्ति नो च विद्विषते मिथः।
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः॥

(ii) ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि॥

*अथवा,*

(c) 'सा नो भूमिः पूर्वपेयें दधातु'— मन्त्रांशोऽयं कुत्र समाम्नातः? कोऽत्र ऋषिः, का वा देवता? भवदीय-पाठ्यांशमवलम्ब्य सूक्तस्यास्य उपजीव्यं सगुरुत्वं पर्यालोच्यताम्। 1+1+1+5+2

## Section – C

### Unit – I

### (Marks : 10)

5. (a) अधोलिखितयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि।
यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः॥

(ii) स ह निर्दश आस तं होवाच— निर्दशो न्वभूद्यजस्व माऽनेनेति; स होवाच, यदा वै पशोर्दन्ता जायन्तोऽथ स मेध्यो भवति; दन्ता न्वस्य जायन्तामथ त्वा यजा इति; तथेति॥

*अथवा,*

(b) अधोलिखितयोः यथाभिलाषम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या। 10×1

(i) आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥

(ii) तमेतमभिषेचनीये पुरुषं पशुमालेभे॥

*अथवा,*

(c) 'मनुरेवैकः परिशिशिषे'— सन्दर्भोऽयं कुत्र समुपलभ्यते? भवदीय-पाठ्यांशमवलम्ब्य प्रासङ्गिकम् आख्यानं समुपवर्ण्यताम्। 2+8

## Unit – II

**(Marks : 15)**

6. निम्नोद्धृतेषु ***एकतमस्य*** सप्रसङ्गं व्याख्या कार्या। 7×1

(a) मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

(b) अमृतत्वस्य तु नाशास्ति वित्तेन।

(c) आत्मनस्तु कामाय सर्वं प्रियं भवति।

7. (a) बृहदारण्यकोपनिषद् कस्मिन् वेदे समाम्नाता? अस्याः उपनिषदः मुख्यम् उपजीव्यं सम्यगालोच्यताम्। 2+6

***अथवा,***

(b) बृहदारण्यकोपनिषदः एवं विधे नामकरणे किं कारणम्? बृहदारण्यकोपनिषदमवलम्ब्य जीवात्मनः उत्क्रान्तिः सविशदम् आलोच्यताम्। 2+6